गङ्गायां स्नानमहं करिष्ये इति वाक्ये विशेषः। अत्रार्घ्यदानमङ्गं एतत् स्नानादेव माघप्रातः-स्नानं तन्त्रेणैव सिध्यति ॥ * ॥

अथ विधानसप्तमीव्रतम् ।

प्रथमतो ब्राह्मणान् स्वस्तिवाच्य ॐ सूर्य्यः सोम इत्यादि पठित्वा ताम्रादिपात्रे कुशतिलजला-न्यादाय ॐ तत् सदित्युच्चार्य्य ओमद्य माघे मासि शुक्ले पक्षे सप्तम्यान्तिथावारभ्य प्रति-मासीयशुक्लसप्तम्यां पौषसप्तमीं यावत् आरो-ग्यसम्पत्कामोऽभीष्टतत्तत्फलकामो वा अर्का-ग्रादीतरभोजनविच्छित्तिविधानेन सप्तमीव्रत-महं करिष्ये इति सङ्कल्प्य संयमपारणसहितं तत्तन्मासि तत्तन्नियमं कुर्य्यात् । तत्र माघे अर्काग्रमात्रं भुञ्जीत । फाल्गुने अन्तरीक्ष-गृहीतं कपिलाविड्यवमात्रप्रमाणं तदभावे अन्यगोमयमपीति । चैत्रे मरीचमेकम् । वैशाखे किञ्चिज्जलम् । ज्यैष्ठे अपक्वकदली-फलमध्यकणामात्रम् । आषाढ़े स्वच्छायद्विगुण-समये यवप्रमाणं कुशमूलम् । श्रावणे नक्तं काले अल्पहविष्यौदनम् । भाद्रे शुद्धोपवासः । आश्विने पञ्चमार्द्धयामे मयूराण्डप्रमाणं हवि-ष्यान्नम् । कार्त्तिके अर्द्धप्रसृतिमात्रं कपिला-क्षीरं तदभावे क्षीरान्तरम् । मार्गशीर्षे प्राङ्-मुखो वायुशनम् । पौषे स्वल्पं घृतम् । तदन-न्तरञ्च ।

"ब्राह्मणान् भोजयेत् भक्त्या गुड़क्षीरनिरामिषैः।
विप्राय दक्षिणा देया विभवस्यानुरूपतः ॥
अष्टम्यां पारणं कुर्य्यात् कट्वम्लरहितेन च ।
मुद्गमाषतिलादीनि घृतञ्चैव विवर्ज्जयेत् ॥
एकसिद्धं भक्ष्यमुक्तमर्कतन्त्रानुसारतः ॥"

चान्द्रमासविशेषोल्लेखवत् अनन्तादिव्रतवत्-मलमासेतरे तत्तु कर्त्तव्यम् ॥ * ॥

अथारोग्यसप्तमी ।

तत्र पूर्व्ववत् सप्तम्यान्तिथावारभ्य ऐहिकारोग्य-धनधान्यपारलौकिकशुभस्थानप्राप्तिकामः संव-त्सरं यावत् आरोग्यसप्तमीव्रतमहं करिष्ये इति सङ्कल्प्य प्रतिमासशुक्लसप्तम्यां शालग्रामे घटादिस्थजले वा पूजयेत् । रक्ताम्बुजासन-मिति ध्यात्वा एतत् पाद्यं ॐ सूर्य्याय नम इत्यादिभिः संपूज्य ।

"आदित्य भास्कर रवे भानो सूर्य्य दिवाकर ।
प्रभाकर नमस्तेऽस्तु रोगादस्मान् प्रमोचय ॥"

इति त्रिःपूजयेत् । एवं संवत्सरे पूर्णे दक्षिणां दद्यात् । ब्राह्मणांश्च भोजयेत् । विशेषमासानु-द्देशादमावास्याव्रतवत् मलमासेऽपि कर्त्तव्यम् ॥

अथ भीष्माष्टमी ।

अष्टम्यां ब्राह्मणः पितृतर्पणं कृत्वा

"ॐ वैयाघ्रपद्यगोत्राय साङ्कृतिप्रवराय च ।
अपुत्राय ददाम्येतत् सलिलं भीष्मवर्म्मणे ॥"

इति पितृवत् भीष्मं तर्पयेत् ॥ ततः कृता-ञ्जलिः ।

"भीष्मः शान्तनवो वीरः सत्यवादी जितेन्द्रियः।
आभिरद्भिरवाप्नोतु पुत्त्रपौत्त्रोचितां क्रियाम् ॥"

इत्यनेन प्रार्थयेत् । क्षत्त्रियादिभिः पितृतर्पणात् पूर्व्वं एतत् कर्त्तव्यम् ॥ * ॥ भैम्यामेकादश्या-मुपोष्य द्वादश्यां तिलोद्वर्त्तनमावश्यकं कर्त्त-व्यम् । स्नानतर्पणमहादानभोजनादि यथा-लाभं कुर्य्यात् ॥ * ॥ माघपौर्णमास्यां युगाद्या-त्वेन पार्व्वणविधिना श्राद्धं कर्त्तव्यम् । अनन्त-फलकामनया स्नानदानञ्च कर्त्तव्यम् । तस्यां दानप्रमाणन्तु तिथितत्त्वेऽनुसन्धेयम् ॥

इति कृत्यतत्त्वम् ॥*॥*॥

अथ माघस्नानफलम् ।

"व्रतदानैस्तपोभिश्च न तथा प्रीयते हरिः ।
माघमज्जनमात्रेण यथा प्रीणाति केशवः ॥
न समं विद्यते किञ्चित् तेजः सौरेण तेजसा ।
तद्वत् स्नानेन माघस्य न समाः क्रतुजाः
क्रियाः ॥
प्रीतये वासुदेवस्य सर्व्वपापापनुत्तये ।
माघस्नानं प्रकुर्व्वीत स्वर्गलाभाय मानवः ॥
किं रक्षितेन देहेन सुपुष्टेन बलीयसा ।
अध्रुवेणाशु हेयेन माघस्नानं विना भवेत् ॥
मकरस्थे रवौ यो हि न स्नात्यनुदिते रवौ ।
कथं पापैः प्रमुच्येत कथं स त्रिदिवं व्रजेत् ॥
ब्रह्महा हेमहारी च सुरापो गुरुतल्पगः ।
माघस्नायी विपापः स्यात्तत्संसर्गी च पञ्चमः ॥
उपपातकानि सर्व्वाणि पातकानि महान्ति च ।
भस्मीभवन्ति सर्व्वाणि माघस्नायिनि मानवे ॥
पावका इव दीप्यन्ते माघस्नाता नरोत्तमाः ।
विमुक्ताः सर्व्वपापेभ्यो मेघेभ्य इव चन्द्रमाः ॥
आर्द्रं शुष्कं लघु स्थूलं वाङ्मनःकर्म्मभिः कृतम् ।
माघस्नानं दहेत् सर्व्वं पावकः समिधो यथा ॥
प्रामादिकञ्च यत् पापं ज्ञानाज्ञानकृतञ्च यत् ।
स्नानमात्रेण तन्नश्येत् मकरस्थे दिवाकरे ॥
निष्पापास्त्रिदिवं यान्ति पापिष्ठा यान्ति शुद्ध-
ताम् ।
सन्देहोऽत्र न कर्त्तव्यो माघस्नाने नराधिप ! ॥
सर्व्वेऽधिकारिणो ह्यत्र विष्णुभक्तौ यथा नृप ! ।
सर्व्वेषां स्वर्गदो माघः सर्व्वेषां पापनाशनः ॥
एतदेव परो मन्त्रो ह्येतदेव परं तपः ।
प्रायश्चित्तं परञ्चैव माघस्नानमनुत्तमम् ॥
नृणां जन्मान्तराभ्यासात् माघस्नानमतिर्भवेत् ।
अध्यात्मज्ञानकौशल्यं जन्माभ्यासाद्यथा नृप! ॥
संसारकर्द्दमालेपप्रक्षालनविशारदम् ।
पावनं पावनानाञ्च माघस्नानं परन्तप ! ॥
स्नाता माघे च ये राजन् ! सर्व्वकामफलप्रदे ।
ते तांश्च भुञ्जते लोकांश्चन्द्रसूर्य्यग्रहोपमान् ॥"

इति श्रीपद्मपुराणे उत्तरखण्डे ४ अध्यायः ॥

माघवती, स्त्री, ( मघवान् देवताऽस्याः यद्वा, मघवत इयमिति । मघवत्+अण् । "मघवा बहुलम् ।" ६ । ४ । १२८ । इति त्रादेशः । ङीप् । ) पूर्व्वदिक् । इति राजनिर्घण्टः ॥

माघवनं, क्ली, इन्द्रसम्बन्धि वस्तु । मघवत इद-मित्यर्थे अण्प्रत्ययेन निष्पन्नम् । इति मुग्धबोध-व्याकरणम् ॥ ( मघवन्+अण् । "मघवा बहु-लम् ।" ६ । ४ । १२८ । इति विकल्पात्त्र-भावादेशः । त्रि, यथा, माघे । ६ । २५ ।

"वसुधान्तनिःसृतमिवाहिपतेः
पटलं फणामणिसहस्ररुचाम् ।
स्फुरदंशुजालमथ शीतरुचः
ककुभं समस्कुरुत माघवनीम् ॥")

माघी, स्त्री, ( मघया युक्तः कालः अस्यां इति । मघा+"नक्षत्रेण युक्तः कालः ।" ४ । २ । ३ । इत्यण् ङीप् । ) मघायुक्ता पौर्णमासी । यथा,

"पुष्ययुक्ता पौर्णमासी पौषी मासे तु यत्र सा ।
नाम्ना स पौषो माघाद्याश्चैवमेकादशापरे ॥"

इत्यमरः । १ । ४ । १३ ॥ माघी पूर्णिमा । यथा, अयोध्याकाण्डे भरतशपथे ।

"आषाढ़ी कार्त्तिकी माघी तिथयः पुण्य-
सम्भवाः ।
अप्रदानवतो यान्तु यस्यार्य्योऽनुमतो गतः ॥"

विष्णुधर्म्मोत्तरे ।

"पौर्णमासी तथा माघी श्रावणी च नरो-
त्तम ! ।
प्रौष्ठपद्यामतीतायां तथा कृष्णा त्रयोदशी ॥
एतांस्तु श्राद्धकालान् वै नित्यानाह प्रजा-
पतिः ॥"

सा च कलियुगाद्या । यथा,—

"अथ भाद्रपदे कृष्णे त्रयोदश्यान्तु द्वापरम् ।
माघे च पौर्णमास्यां वै घोरं कलियुगं
स्मृतम् ॥"

अस्यां कर्म्मणोऽनन्तफलं यथा, मात्स्ये ।

"शतमिन्दुक्षये पुण्यं सहस्रन्तु दिनक्षये ।
विषुवे शतसाहस्रमा का मा वेष्वनन्तकम् ॥"

आ का मा वेषु आषाढ़ीकार्त्तिकीमाघीवैशा-खीषु । इति तिथ्यादितत्त्वम् ॥ माघ्यां मघा-योगाभावे सिंहस्थगुरावकालप्रतिप्रसवो यथा, शातातपः ।

"माघ्यां यदि मघा नास्ति सिंहे गुरुरकार-
णम् ॥"

राजमार्त्तण्ड इत्थः ।

"गुरौ हरिस्थे न विवाहमाहु-
र्हारीतगर्गप्रमुखा मुनीन्द्राः ।
यदा न माघी मघसंयुता स्यात्-
तदा च कन्योद्वहनं वदन्ति ॥"

इत्यत्र माघ्यां मघायोगाभावेऽपि श्रुतिवेधादि-मघास्थेऽपि गुरौ भवति विवाहस्तु गुरोर्मघा-परित्यागादेव । इति मलमासतत्त्वम् ॥

माघोनी, स्त्री, ( मघवान् देवताऽस्याः । मघोन इयमिति वा । इति मघवन्+अण् ङीप् । ) पूर्व्वा दिक् । इति राजनिर्घण्टः ॥ ( इन्द्रसम्ब-न्धिनि, त्रि । यथा, ऋग्वेदे । १० । ६६ । २ ।

"मरुद्गणे वृजने मन्म धीमहि
माघोने यज्ञं जनयन्त सूरयः ॥"

"माघोने मघवत इन्द्रस्य सम्बन्धिनि मरुद्गणे ।" इति तद्भाष्ये सायनः ॥ )